✧˖°*❋ ❋*°˖✧

# दैनिक हवन यज्ञ मंत्र

# Havan mantra

✧˖°*❋ ❋*°˖✧

# हवन यज्ञ मंत्र

**गायत्री मंत्र**

ॐ भूर्भुवः स्वः। तत् सवितुर्वरेण्यं भर्गोदेवस्यधीमहि। धियो यो नः प्रचोदयात्।। (यजुर्वेद 36.3)

ईश्वर-स्तुति प्रार्थना

ॐ विश्वानि देव सवितुर्दुरितानि परासुव। यद् भद्रं तन्न आ सुव।। (यजुर्वेदः 30.3)

**आचमनः**

ॐ केशवाय नमः,
ॐ नारायणाय नमः,
ॐ माधवाय नमः

ॐ ऋषिकेशाय नमः इति हस्तप्रक्षालनम्।

ॐ शन्नो देवीर्भिष्टय ऽ आपो भवन्तु पीतये। शँयोर्भिस्रवन्तु नः।

**पवित्रिकरणः**

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यंतरः शुचिः।।

**तिलकः**

ॐ त्रिलोचन भव।
ॐ चन्दनस्य महत्पुण्यं पवित्रं पापनानम।
आपदां हरते नित्यं लक्ष्मीः तिष्ठति सर्वदा।।

**रक्षा सूत्रः मौली**

येन बद्धो बलिराजा दानवेन्द्रो महाबल।
तेन त्वां प्रतिबध्नामि रक्षे माचल माचल।।

**दीप समर्पणः**

दीपोस्तमो नाशयन्ति दीपः कान्तिं प्रयच्छति ।
तस्माद्दीप प्रदानेन प्रीयतां मे जनार्दनः ।।

दीपो ज्योति परं ब्रह्म दीपो ज्योति जनार्दनः ।
दीपो हरतु मे पापं दीपज्योतिः नमोऽस्तु ते ।।

शुभं करोतु कल्याणं आरोग्यं सुखसंपदम् ।
शत्रुबुद्धि विनाशाय दीपोज्योतिः नमोऽस्तु ते ।।

**कलश पूजनः**

ब्रह्माण्डोदरतीर्थानी करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकरः ।।

ॐ गंगे च यमुने चैव गोदावरी सरस्वति ।
नर्मदे सिन्धु कावेरी जलेऽस्मिन सन्निधिं कुरु ।।
ॐ वं वरुणाय नमः । ॐ वरुणदेवाय नमः ।

**रक्षा विधानः**

अपक्रमन्तु भूतानि पिशाचाः सर्वतो दिशाः ।
सर्वेषामविरोधेन यज्ञकर्म समारम्भे ।

हवन पूजन का संकल्पः

ॐ विष्णुः विष्णुः विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य, अद्य श्रीब्राह्मणोअह्नि द्वितिये परार्धे श्रीश्वेतवाराहकल्पे, सप्तमे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे युगे कलियुगे, कलि प्रथम चरणे, भूर्लोके, जम्बूद्वीपे, भारतवर्षे, ........ प्रदेशे..... नगरे..... ग्रामे मासानां ... . मासे, शुभे .... पक्षे, .... तिथौ, वासराधि...... वासरे, अद्य ........ आपदां निवारण अर्थे आयुः, आरोग्यः, यशः, कीर्तिः, पुष्टिः .... अर्थे ॐ ह्रीं ॐ मंत्रस्य हवन काले संकल्पं अहं करिष्ये ।

## स्वस्तिवाचन

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पुषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

## गुरु श्लोकः

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्मा तस्मै श्री गुरवे नमः ॥

## गणपति मंत्र

वक्रतुंड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।

## अग्नि प्रज्वलन

ॐ अग्निं प्रज्वलितं वन्दे जात वेदं हुताशनम् ।
हिरण्यवर्णममलं समिद्धं विश्वतोमुखम् ।।

## घृताहुति

ॐ अयन्त इध्म आत्मा जातवेदस् तेनेध्यस्व वर्धस्व चेद्ध वर्धय । चास्मान् प्रजया पशुभिर्
ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ।।
इदमग्नये जातवेदसे – इदन्न मम ।।

ॐ अग्नये स्वाहा । इदमग्नये – इदन्न मम ।।
ॐ सोमाय स्वाहा । इदं सोमाय – इदन्न मम ।।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये – इदन्न मम ।।
ॐ इन्द्राय स्वाहा । इदमिन्द्राय – इदन्न मम ।।

## गणपतिः आठ आहूतियाँ

ॐ गं गणपतये नमः स्वाहा ।

## देवताओं के लिए आहुतियाँ

ॐ श्रीमन्महागणाधिपतये नमः स्वाहा ।
ॐ श्री गुरुभ्यो नमः स्वाहा ।
ॐ इष्टदेवताभ्यो नमः स्वाहा ।

ॐ कुलदेवताभ्यो नमः स्वाहा ।
ॐ ग्रामदेवताभ्यो नमः स्वाहा ।
ॐ वास्तुदेवताभ्यो नमः स्वाहा ।
ॐ स्थानदेवताभ्यो नमः स्वाहा ।
ॐ लक्ष्मीनारायणाभ्यां नमः स्वाहा ।
ॐ उमामहेश्वराभ्यां नमः स्वाहा ।
ॐ वाणीहिरण्यगर्भाभ्यां नमः स्वाहा ।
ॐ शचीपुरन्दनाभ्यां नमः स्वाहा ।
ॐ मातृपितृचरणकमलेभ्यो नमः स्वाहा ।
ॐ सर्वेभ्यो देवेभ्यो नमः स्वाहा ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः स्वाहा ।

**पंच प्राणाहुतिः**

ॐ प्राणाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ उदानाय स्वाहा ।

## महामृत्युञ्जयमंत्र विनियोग

ॐ अस्य श्री महामृत्युञ्जय मंत्रस्य वशिष्ठ ऋषिः, अनुष्टुप छंदः, श्री महामृत्युंजय रुद्रो देवता, हौं बीजं, जूं शक्तिः, सः कीलकं आयुः आरोग्यः यशः कीर्तिः तथा पुष्टिः वृद्धि अर्थे जपे तथा हवने विनियोगः ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात ।।

**हवन के बाद**

हे ईश्वर दयानिधे ! भवत्कृपयाऽनेन जपोपासनादि-कर्मणा धर्मार्थ-काम-मोक्षाणां सद्यः सिद्धिर्भवेन्नः ।

## नमस्कार मंत्र

ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ।।

ॐ यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा।। यजु. 32-14

ॐ चित्तात्मिकां महाचित्तिं चित्तस्वरूपिणीं आराधयामि
चित्तजान रोगान शमय शमय ठं ठं ठं स्वाहा ठं ठं ठं स्वाहा |

## समापन

मंगलं भगवान विष्णुः मंगलं गरुड़ध्वज ।
मंगलं पुण्डरीकाक्षं मंगलाय तन्नो हरि ।

कर्पूर गौरं करुणावतारं संसारसारं भुजगेन्द्रहारं ।
सदावसन्तं हृदयारविन्दे भवं भवानि सहितं नमामि ।

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै।।
ॐ शान्तिः शान्तिः शान्तिः।

ॐ पूर्ममदः पूर्णमिदं पूर्णात् पूर्ममुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत ।। स्वाहा ।।

## घृत की आहुतियाँ दें

ॐ श्रीपतये स्वाहा ।
ॐ भुवनपतये स्वाहा ।
ॐ भूतानांपतये स्वाहा ।
ॐ अग्नये स्विष्टकृते स्वाहा । इदं अग्नये स्विष्टकृते न मम ।
ॐ सर्वं वै पूर्णं स्वाहा ।।

## वैश्विक कल्याण की प्रार्थना

दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात्।
शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान विमोच्यत्।।

स्वस्ति प्रजाभ्याः परिपालयन्ता न्यायेन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु।।

काले वर्षतु पर्जन्यः पृथिवी शस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः।।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
सर्वः सद्बुद्धिवाप्नोतु सर्व सर्वत्र नन्दतु।।

स्वस्ति मात्रे उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः।
विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम्।।

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम्।।

**यजमान परिवार को आशीर्वाद :**
ॐ सत्याः सन्तु यजमानस्य कामाः ।
ॐ सफलाः सन्तु यजमानस्या कामाः ।
ॐ पूर्णाः सन्तु यजमानस्य कामाः ।
ॐ सौभाग्यमस्तु, शुभं भवतु, कल्याणमस्तु ।
ॐ स्वस्ति, स्वस्ति स्वस्ति ।।

## शान्ति-पाठ

ॐ द्यौः शान्तिर्न्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्ति शान्तिरेव शान्तिः सा मा शान्तिरेधि ।।
ॐ शान्तिः शान्तिः शान्तिः ।।

## प्रदक्षिणा मन्त्र

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे ।।

≪•◦ ❈ ◦•≫

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net